# প্রপত্ত্যষ্টকম্

{॥ প্রপত্ত্যষ্টকম্ ॥}

আবর্তপুর্যাং জনিতং প্রপদ্যে পাণ্ড্যেশদেশে বিহৃতং প্রপদ্যে ।

শোণাচলপ্রস্থচরং প্রপদ্যে ভিক্ষুং তপঃক্লেশসহং প্রপদ্যে ॥ ১॥

আব্রহ্মকীটান্তসমং প্রপদ্যে জিতারিষড্বর্গমহং প্রপদ্যে ।

সর্বজ্ঞতাসারভৃতং প্রপদ্যে নিস্সীমকারুণ্যনিধিং প্রপদ্যে ॥ ২॥

অস্মাৎপ্রপঞ্চাদধিকং প্রপদ্যে বিশ্বাধিকোক্তের্বিষযং প্রপদ্যে ।

কালগ্রহগ্রাহভযাপনুত্যৈ কৃতান্তশিক্ষাকৃতিনং প্রপদ্যে ॥ ৩॥

বিনেতুমার্তিং বিষযাধ্বজন্যাং বিজ্ঞানমূর্তিং দধতং প্রপদ্যে ।

কন্দর্পদর্পজ্বরবারণায কামারিলীলাবতারং প্রপদ্যে ॥ ৪॥

আজন্মবর্ণিব্রতিনং প্রপদ্যে কুণ্ডীভৃতং দণ্ডধরং প্রপদ্যে ।

ব্রহ্মাসনধ্যানরতং প্রপদ্যে ব্রহ্মাত্মভূযং যতিনং প্রপদ্যে ॥ ৫॥

হরং প্রপদ্যে বিজরং প্রপদ্যে স্বতন্ত্রতাযাঃ সদনং প্রপদ্যে ।

অমেযসামর্থ্যবহং প্রপদ্যে বিশুদ্ধবিজ্ঞানিবরং প্রপদ্যে ॥ ৬॥

দৌর্ভাগ্য তাপত্রয কর্ম মোহ সন্তাপহন্তারমহং প্রপদ্যে ।

যথার্থসঙ্কল্পমপেতপাপমবাপ্ত কামং বিশুচং প্রপদ্যে ॥ ৭॥

মনঃ প্রসাদং ভজতাং দদানং মুগ্ধস্মিতোল্লাসিমুখং প্রপদ্যে ।

ব্যথামশেষাং ব্যপনীয মোদপ্রদেন নাম্না রমণং প্রপদ্যে ॥ ৮॥

শিবং প্রপদ্যে শিবদং প্রপদ্যে গুরুং প্রপদ্যে গুণিনং প্রপদ্যে ।

মদীযহৃৎপদ্মজুষং প্রপদ্যে শরণ্যমীশং শরণং প্রপদ্যে ॥ ৯॥

প্রপত্তিং রমণস্যৈতাং তন্বতাং তত্ত্বদর্শিনঃ

তৎক্রতুন্যাযরসিকাঃ তত্তাদৃশফলাপ্তযে ॥ ১০॥

॥ ইতি শ্রীজগদীশ শাস্ত্রী বিরচিতং প্রপত্ত্যষ্টকম্ সম্পূর্ণম্ ॥

Prapattyashtakam, Eight Verses of Surrender, was

composed in praise of Ramana Maharshi, just at the eleventh hour when

Jagadisha Shastri had been diagnosed with terminal stomach cancer.

It is said that Maharshi was so moved that he saved him then to live

for a further 38 years.

Encoded and proofread by Anil Sharma anilandvijaya at gmail.com

Reproofread by Sunder Hattangadi sunderh at hotmail.com

The Sanskrit works, published by Sri Ramanasramam,

have been approved to be posted on sanskritdocuments.org

by permission of Sri V.S. Ramanan, President, Sri Ramanasramam,

Website : http://www.sriramanamaharshi.org

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Prapatya Ashtakam Lyrics in Bengali PDF
% File name : prapattyaShTakam.itx
% Category : aShTaka
% Location : doc_deities_misc
% Author : Jagadisha Shastri
% Language : Sanskrit
% Subject : philosophy/hinduism/religion composed in praise of Ramana Maharshi, just at the eleventh hour when Jagadisha Shastri had been diagnosed with terminal stomach cancer. It is said that Maharshi was so moved that he saved him then to live for a further 38 years. The Sanskrit works, published by Sri Ramanasramam have been approved to be posted on Sanskritdocuments.org by permission of Sri V.S. Ramanan, President, Sri Ramanasramam.
% Transliterated by : Anil Sharma anilandvijaya at gmail.com
% Proofread by : Anil Sharma, Sunder Hattangadi sunderh at hotmail.com
% Description-comments : Prapattyashtakam, Eight Verses of Surrender was
% Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org
% Latest update : October 1, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.

Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website